# श्री ललिताष्टोत्तरशतनाम स्तोत्रं

ओं रजताचलशृंगाग्रमद्ध्यस्थायै नमो नमः
ओं हिमाचलमहावंशपावनायै नमो नमः
ओं शङ्करार्द्धांगसौन्दर्यशरीरायै नमो नमः
ओं लसन्मरतकस्वच्छविग्रहायै नमो नमः
ओं महातिशयसौन्दर्यलावण्यायै नमो नमः
ओं शशाङ्कशेखरप्राणवल्लभायै नमो नमः
ओं सदापञ्चदशात्मैक्यस्वरूपायै नमो नमः
ओं वज्रमाणिक्यकटककिरीटायै नमो नमः
ओं कस्तुरीतिलकोद्भासिनिटिलायै नमो नमः
ओं भस्मरेखङ्कितलसन्मस्तकायै नमो नमः 10
ओं विकचांभोरुहदळलोचनायै नमो नमः
ओं शरच्चाम्पेयपुष्पाभनासिकायै नमो नमः
ओं लसत्कनकताटङ्कयुगळायै नमो नमः
ओं मणिदर्पणसङ्काशकपोलायै नमो नमः
ओं तांबूलपूरितस्मेरवदनायै नमो नमः
ओं सुपक्वदाडिमीबीजरदनायै नमो नमः
ओं कंबुपूगसमच्छायकन्धरायै नमो नमः
ओं स्थूलमुक्ताफलोदारसुहारायै नमो नमः
ओं गिरीशबद्धमांगल्यमंगळायै नमो नमः
ओं पद्मपाशाङ्कुशलसत्काराब्जायै नमो नमः 20
ओं पद्मकैरवमन्दारसुमालिन्यै नमो नमः
ओं सुवर्णकुंभयुग्माभसुकुचायै नमो नमः
ओं रमणीयचतुर्बाहुसंयुक्तायै नमो नमः
ओं कनकांगदकेयूरभूषितायै नमो नमः
ओं बृहत्सौवर्णसौन्दर्यवसनायै नमो नमः
ओं बृहन्नितंबविलसद्रशनायै नमो नमः
ओं सौभाग्यजातशृंगारमध्यमायै नमो नमः
ओं दिव्यभूषणसन्दोहरञ्जितायै नमो नमः
ओं पारिजातगुणाधिक्यपदाब्जायै नमो नमः
ओं सुपद्मरागसङ्काशचरणायै नमो नमः 30
ओं कामकोटिमहापद्मपीठस्थायै नमो नमः
ओं श्रीकण्ठनेत्रकुमुदचन्द्रिकायै नमो नमः
ओं सचामररमावाणिवीजितायै नमो नमः
ओं भक्तरक्षणदाक्षिण्यकटाक्षायै नमो नमः
ओं भूतेशालिंगनोद्भूतपुळकांग्यै नमो नमः

ओं अनंगजनकापांगवीक्षणायै नमो नमः
ओं ब्रह्मोपेन्द्रशिरोरत्नरञ्जितायै नमो नमः
ओं शचीमुखामरवधूसेवितायै नमो नमः
ओं लीलाकल्पितब्रह्माण्डमण्डलायै नमो नमः
ओं अमृतादिमहाशक्तिसंवृतायै नमो नमः 40
ओं एकातपत्रसाम्राज्यदायिकायै नमो नमः
ओं सनकादिसमाराद्ध्यपादुकायै नमो नमः
ओं देवर्षिसंस्तूयमानवैभवायै नमो नमः
ओं कलशोद्भवदुर्वासपूजितायै नमो नमः
ओं मत्तेभवक्त्रषड्वक्त्रवत्सलायै नमो नमः
ओं चक्रराजमहायन्त्रमद्ध्यवर्त्त्यै नमो नमः
ओं चिदग्निकुण्डसंभूतसुदेहायै नमो नमः
ओं शशाङ्कखण्डसंयुक्तमकुटायै नमो नमः
ओं मत्तहंसवधूमन्दगमनायै नमो नमः
ओं वन्दारुजनसन्दोहवन्दितायै नमो नमः 50
ओं अन्तर्मुखजनानन्दफलदायै नमो नमः
ओं पतिव्रतांगनाभीष्टफलदायै नमो नमः
ओं अव्याजकरुणापूरपूरितायै नमो नमः
ओं निरञ्जनचिदानन्दसंयुक्तायै नमो नमः
ओं सहस्रसूर्यसंयुक्तप्रकाशायै नमो नमः
ओं रत्नचिन्तामणिगृहमद्ध्यस्थायै नमो नमः
ओं हानिवृद्धिगुणाधिक्यरहितायै नमो नमः
ओं महापद्माटवीमद्ध्यनिवासायै नमो नमः
ओं जाग्रत्स्वप्नसुषुप्तीनांसाक्षिभूत्यै नमो नमः
ओं महातापौघपापानांविनाशिन्यै नमो नमः 60
ओं दुष्टभीतिमहाभीतिभञ्जनायै नमो नमः
ओं समस्तदेवदनुजप्रेरकायै नमो नमः
ओं समस्तहृदयांभोजनिलयायै नमो नमः
ओं अनाहतमहापद्ममन्दिरायै नमो नमः
ओं सहस्रारसरोजातवासितायै नमो नमः
ओं पुनरावृत्तिरहितपुरस्थायै नमो नमः
ओं वाणीगायत्रिसावित्रिसन्नुतायै नमो नमः
ओं रमाभूमिसुताराध्यपदाब्जायै नमो नमः
ओं लोपामुद्रार्च्चितश्रीमच्चरणायै नमो नमः
ओं सहस्ररतिसौन्दर्यशरीरायै नमो नमः 70
ओं भावनामात्रसन्तुष्टहृदयायै नमो नमः
ओं नतसंपूर्णविञ्जानसिद्धिदायै नमो नमः

ओं त्रिलोचनकृतोल्लासफलदायै नमो नमः
ओं श्रीसुधाब्धिमणिद्वीपमध्यगायै नमो नमः
ओं दक्षाध्वरविनिर्भेदसाधनायै नमो नमः
ओं श्रीनाथसोदरीभूतशोभितायै नमो नमः
ओं चन्द्रशेखरभक्तार्त्तिभञ्जनायै नमो नमः
ओं सर्वोपाधिविनिर्म्मुक्तचैतन्यायै नमो नमः
ओं नामपरायणाभीष्टफलदायै नमो नमः
ओं सृष्टिस्थितितिरोधानसङ्कल्पायै नमो नमः 80
ओं श्रीषोडशाक्षरीमन्त्रमध्यगायै नमो नमः
ओं अनाद्यन्तस्वयंभूतदिव्यमूर्त्त्यै नमो नमः
ओं भक्तहंसवतीमुख्यनियोगायै नमो नमः
ओं मातृमण्डलसंयुक्तलळितायै नमो नमः
ओं भण्डदैत्यमहासत्वनाशनायै नमो नमः
ओं क्रुरभण्डशिरच्छेदनिपुणायै नमो नमः
ओं धराच्युतसुराधीशसुखदायै नमो नमः
ओं चण्डमुण्डनिशुंभादिखण्डनायै नमो नमः
ओं रक्ताक्षरक्तजिह्वादिशिक्षणायै नमो नमः
ओं महिषासुरदोर्व्वीर्यनिग्रहायै नमो नमः 90
ओं अभ्रकेशमहोत्साहकारणायै नमो नमः
ओं महेशयुक्तनटनतत्परायै नमो नमः
ओं निजभर्त्तृमुखांभोजचिन्तनायै नमो नमः
ओं वृषभध्वजविञ्जाननतपस्सिद्ध्यै नमो नमः
ओं जन्ममृत्युजरारोगभञ्जनायै नमो नमः
ओं विरक्तिभक्तिविज्ञानसिद्धिदायै नमो नमः
ओं कामक्रोधादिषड्वर्ग्गनाशनायै नमो नमः
ओं राजराजार्च्चितपदसरोजायै नमो नमः
ओं सर्व्ववेदान्तसिद्धान्तसुतत्त्वायै नमो नमः
ओं श्रीवीरभक्तविज्ञाननिधानायै नमो नमः 100
ओं अशेषदुष्टदनुजसूदनायै नमो नमः
ओं साक्षाच्छ्रीदक्षिणामूर्त्तिमनोज्ञायै नमो नमः
ओं हयमेधाग्रसंपूज्यमहिमायै नमो नमः
ओं दक्षप्रजापतिसुतावेषाढ्यायै नमो नमः
ओं सुमबाणेक्षुकोदण्डमण्डितायै नमो नमः
ओं नित्ययौवनमांगल्यमंगळायै नमो नमः
ओं महादेवसमायुक्तमहादेव्यै नमो नमः
ओं चतुर्व्विंशतितत्त्वैकस्वरूपिण्यै नमो नमः 108

ओं इति श्री लळिताष्टोत्तरशतस्तोत्रनामावलि समाप्तं

सर्व्वमंगळ मंगल्ये
शिवे सर्व्वार्त्थसाधिके
शरण्ये त्र्यंबिके गौरी
नारायणी नमोस्तुते !!!

## शान्ति मन्त्रङ्ङळ

सर्वेषां स्वस्तिर्भवतु
सर्वेशां शान्तिर्भवतु
सर्वेशां पूर्ण्णं भवतु
सर्वेशां मंगळं भवतु

सर्वे भवन्तु सुखिनः
सर्वे सन्तु निरामयाः
सर्वे भद्राणि पश्यन्तु
मा कश्चित् दुःख भाक्भवेत्

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्यायेन मार्गेण महीं महीशाः
गो ब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्ताः सुखिनो भवन्तु

ओं सहना ववतु
सहनौ भुनक्तु
सहवीर्यं करवावहै
तेजस्विनवधीतमस्तु
मा विद्विषावहै
ओं शान्तिः शान्तिः शान्तिः

## समर्प्पणं

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव
त्वमेव विद्या द्रविणं त्वमेव

त्वमेव सर्व्वं मम देवदेवः

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतेस्स्वभावात्
करोमियद्यत् सकलं परस्मै
रामचन्द्रायेति समर्प्पयामि

ओं पूर्ण्णमदः पूर्ण्णमिदं
पूर्ण्णात् पूर्ण्णमुदच्यते
पूर्ण्णस्य पूर्ण्णमादाय
पूर्ण्णमे वावशिष्यते

ओं शान्तिः शान्तिः शान्तिः